# श्री वरलक्ष्मि नमस्तुभ्यम्

रागं: श्री (२२)      ताळं: रूपकम्

श्री मुत्तुस्वामि दीक्षित विरचिता

पल्लवि

श्रीवरलक्ष्मि नमस्तुभ्यं वसुप्रदे
श्रीसारसपदे रसपदे सपदे पदे पदे

अनुपल्लवि

भावजजनकप्राणवल्लभे सुवर्णाभे
भानुकोटिसमानप्रभे भक्तसुलभे

मध्यमकाल साहित्यम्

सेवकजनपालिन्यै श्रितपङ्कजमालिन्यै
केवलगुणशालिन्यै केशवहृत्खेलिन्यै

चरणम्

श्रावणपौर्णमीपूर्वस्थशुक्रवारे

चारुमतीप्रभृतिभिः पूजिताकारे

देवादिगुरुगुहसमर्पितमणिमयहारे
दीनजनसंरक्षणनिपुणकनकधारे

मध्यमकाल साहित्यम्

भावनाभेदचतुरे भारतीसन्नुतवरे
कैवल्यवितरणपरे काङ्क्षितफलप्रदकरे